# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१९

| | | |
|---|---|---|
| **कक्षा – आचार्य-२ (SEM-4)** | **प्रश्नपत्रम् – २** | **गुणाः - ७०** |
| **विषयः - नव्यन्यायः** | **CC- 5.4.10** | **समयः – ११:०० तः २:००** |
| **दिनाङ्कः – ३०/०३/२०१९** | **ग्रन्थः – न्यायकुसुमाञ्जलिः (प्रथमस्तबकम्)** | |

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या ।** ०५

(१) ‘तदिह पञ्चतयी विप्रतिपत्तिः’ यथाग्रन्थं विवृणुत।

(२) जगतः सापेक्षत्वं साधयत।

प्रश्नः -२ **अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

**(१)** ‘भगवति भवे सन्देह एव कुतः’ इति सयुक्ति आशङ्क्य परिहारं यथाग्रन्थं विवृणुत।

**(२)** ‘सत्पक्षः प्रसरस्सतामि’ति मङ्गलश्लोकं ग्रन्थकुसुमयोः पक्षद्वये समन्वयं प्रदर्शयत।

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -३ **अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) एकजातीयकारणवादं निरूपयत।

(२) सहकारिष्वपि शक्तिपदप्रयोगं व्याख्यात।

प्रश्नः -४ **अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

(१) ‘हेतुभूतनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः॥" इति कारिकां व्याख्यात।

(२) ‘विश्ववृत्तिः दृष्टलाभफला न, अपि च सफला’ इति यथाग्रन्थं व्याख्यात।

तृतीयान्वितिः (युनिट-३)

प्रश्नः -५ **अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) "स्वगुणाः परमाणूनां विशेषाः पाकजादयः" इति वाक्यं यथाग्रन्थं व्याख्यात।

(२) ‘निमित्तभेदसंसर्गादुद्भवानुद्भवादयः’ स्पष्टयत।

प्रश्नः -६ **अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

**(१)** ‘जयेतरनिमित्तस्य वृत्तिलाभाय केवलम्।
परेक्ष्यसमवेतस्य परीक्षाविधयोमताः’॥ इति कारिकां व्याख्यात।

**(२)** प्रोक्षणादिजन्योऽतिशयः भूतनिष्ठो न भवतीति सविस्तरं निरूपयत।

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -७ **अधोलिखितयोः एकस्य प्रश्नस्य व्याख्या कार्या ।** ०५

**(१)** नित्यस्य कारणत्वमनुपपन्नमिति शङ्कां परिहरत।

**(२)** 'येन क्षणे तेन स्थिरे' वाक्यमिदं विवृणुत।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

**(१)** 'न विना तत्स्यान्न तस्मिन्ननुमा भवेत्।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना'॥ कारिकां विवृणुत।

**(२)** प्रथमस्तबकार्थोपसंहारश्लोकं व्याख्यात।

प्रश्नः -९ **दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

(१) 'शुद्धबुद्धस्वभाव'इति के कथयन्ति?

(२) पुरुषार्थाः के?

(३) के क्लेशाः?

(४) अभिनिवेशः कः?

(५) ईश्वरस्य सत्त्वेऽपि तस्य प्रमाणाभावादिति केषां विप्रतिपत्तिः?

(६) संख्यानां का विप्रतिपत्तिः?

(७) को नाम वृत्तिलाभः?

(८) संभोगपदस्य कोऽर्थः?

(९) पाखण्डाः के?

(१०) न्यायकुसुमाञ्जल्यां विभागः कथं कृतः?

(११) सहजशक्तिवादिनः के?

(१२) किं नाम पलक्षणम्?

(१३) एककारणवादिनः के?

(१४) संसारः कः उच्यते?

(१५) न्यायकुसुमाञ्जलिः केन रचिता?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१९

| | | |
|---|---|---|
| **कक्षा – आचार्य-२ (SEM-4 )** | **प्रश्नपत्रम् – २** | **गुणाः – ७०** |
| **विषयः – नव्यन्यायः** | **CC- 5.4.10** | **समयः -** |
| **दिनाङ्कः -** | **ग्रन्थः – न्यायकुसुमाञ्जलिः (प्रथमस्तबकम्)** | |

समाधानानि

प्रश्नः - ९

१. उपनिषदः।
२. धर्मार्थकाममोक्षाः।
३. अविद्यास्मितारागद्वेषाऽभिनिवेषाः क्लेशाः।
४. मरणभयम्।
५. जैनानां विप्रतिपत्तिः।
६. ईश्वरसाधकप्रमाणाभावादिति।
७. सहकारिलाभः।
८. सविभक्तभोगः, प्रतिनियतोभोगः।
९. प्रमाणेन खण्डिताः, बौद्धार्हतादयः।
१०. स्तबकनाम्ना।
११. बौद्धाः।
१२. अविद्यमानं सत् व्यावर्तकम्।
१३. चार्वाकाः।
१४. जननमरणप्रवाहः।
१५. उदयनाचार्येण।